त्ववत्, परस्परात्यन्ताभावसामानाधिकरण्ये सति जात्यन्तरेण सामानाधिकरण्याभावात् नाप्यनवस्था रूपत्वादिगतसामान्यान्तरानभ्युपगमात् नापि रूपहानिर्विशेषत्ववत् यदि विशेषाः द्रव्याश्रितत्वे सति जातिमन्तः स्युः गुणाः कर्माणि वा स्युः विभुवृत्तित्वे सति यदि जातिमन्तः स्युर्गुणाः स्युरिति यथा विशेषपदार्थस्वरूपहानिस्तथा प्रकृतेऽभावात् नापि समवायत्ववदसम्बन्धः समवाये समवायाभ्युपगमेऽनवस्थाभयात्तथास्तु, प्रकृते तु समवायस्यैव सम्बन्धस्याभ्युपगमात्। यद्यपि समवायत्वजातिबाधकोव्यक्त्यभेदएव तथापि यन्मते उत्पादविनाशशीलाः बहवः समवायास्तन्मते द्रष्टव्यम्। अभावत्वादिजात्यभ्युपगमे वा बाधकमेतत्, (व्यक्तेरभेदस्तुलत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसंग्रहः)। विवादपदमनुगतबुद्धिः अनुगतनिमित्तसाध्या अबाधितानुगतमतित्वात् दामकुसुमबुद्धिवत् इति जातौ मानमिति वृत्तिकारास्तच्चिन्त्यम्"। उप० वृत्तिः।

"भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव"। सू०

"सामान्यं विशेष इति द्वैविध्यं तदुपपादयन्नाह। भावः सत्ता अनुवृत्तेरेव हेतुः न तु व्यावृत्तेरपि हेतुः तथा च विशेषसंज्ञां लभते"। उप० वृत्तिः

"द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च"। सू०

"केषां सामान्यानां विशेषसंज्ञेत्यपेक्षायामाह। चकारः पृथिवीत्वादीनि द्रव्यगतजातीः रूपत्वादीनि गुणगतजातीः उत्क्षेपणत्वादीनि कर्मगतजातीः समुच्चिनोति। द्रव्यत्वमित्यादावसमासः परस्परं व्याप्यव्यापकभावाभावसूचनार्थम् सामान्यानि विशेषाश्चेत्यत्रासमासः सामान्यत्वे सत्येव विशेषत्वं यथा ज्ञायेत तदर्थम्, अन्यथा सामान्यविशेषा इति षष्ठीसमासभ्रमः स्यात् तथाच सामान्यत्वे सति विशेषत्वं न प्रतीयते। ननु द्रव्याकारानुगतमतिसाक्षिकं न द्रव्यत्वम्, पृथिव्यादौ कथञ्चित्, तत्सत्त्वेऽपि वाय्वाकाशादौ तदसम्भवात् नच गुणत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया तत्सिद्धिः नित्यानित्यवृत्तितया गुणत्वस्य कार्य्यतानवच्छेदकत्वात् गुणत्वार्थमपि पर्य्यनुयोगस्य तादवस्थ्यात्, मैवं संयोगत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धेः सा हि न पृथिवीत्वाद्यवच्छेद्या न्यूनवृत्तित्वात् नापि सत्तावच्छेद्याऽधिकवृत्तित्वात् अवश्यं ह्यवच्छेदकेन भवितव्यम्, अन्यथाकस्मिकतापत्तेः तत्र परमाणुषु द्व्यणुकासमवायिकारणवत्तया द्व्यणुकेषु त्र्यणुकासमवायिकारणवत्तया विभुचतुष्टयस्य सर्वमूर्त्तसंयोगितयैव सिद्धेः मनसि इन्द्रियमनःसंयोगाधारतया वायौ तृणादिनोदनाश्रयतया प्रत्यक्षद्रव्येषु प्रत्यक्षतयैव संयोगाभ्युपगमस्यावश्यकत्वात् अजस्तु संयोगो नास्त्येव येन संयोगत्वस्यापि कार्य्याकार्य्यवृत्तितया कार्य्यतावच्छेदकता न स्यात् एवं विभागसमवायिकारणतावच्छेदकतयाऽपि द्रव्यत्वसिद्धेः सुप्रतिपदत्वात्। गुणत्वन्तु संयोगविभागसमवायिकारणत्वासमवायिकारणत्वशून्ये सामान्यवति यत्कारणत्वं तदवच्छेदकतयैव सिद्धमित्युक्तत्वात् कर्मत्वमपि प्रत्यक्षद्रव्येषु चलतीति-प्रत्ययसाक्षिकम्, अन्यत्र तु संयोगविभागानुमेयं संयोगविभागोभयासमवायिकारणतावच्छेदकतयाऽपि कर्मत्वसिद्धेरावश्यकत्वात्"। उप० वृत्तिः

१२ब्राह्मणादिवर्णे वर्णरूपजातिश्च द्विविधा शुद्धा सङ्कीर्णा च तत्र शुद्धाजातयः ब्राह्मणादयः। सङ्कीर्णजातयश्च मूर्द्धावसिक्तादय: नाना तदेतत् मनुना १०अ० उक्तं यथा "ब्राह्मणः क्षत्रियोवैश्यस्त्रयो वर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः। सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते। स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्। सदृशानेव तानाहुर्मातृदोषविगर्हितान्। अनन्तरासु जातानां विधिरेव सनातनः। द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्। ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव उच्यते। क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते। विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः। वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः। क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः। वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ। शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः। एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ। क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि। पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्। ताननन्तरनाम्नस्तु मातृदोषात् प्रचक्षते। ब्राह्मणादुग्रकन्यायामावृतो नाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः। अयोगवश्च क्षत्ता च चाण्डालश्चाधमो नृणाम्। प्राति-